# ચાટુપુષ્પાઞ્જલિઃ

Chatupushpanjalih

sanskritdocuments.org

February 23, 2019

# Chatupushpanjalih

# ચાટુપુષ્પાઞ્જલિઃ

## Sanskrit Document Information

Text title : chATupuShpAnjaliH

File name : chATupuShpAnjaliH.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 23, 2019

*sanskritdocuments.org*

# ચાટુપુષ્પાઞ્જલિઃ

શ્રીરાધિકાયૈ નમઃ ।
નવગોરોચનાગૌરી પ્રવરેન્દ્રીવરામ્બરામ્ ।
મણિસ્તવકવિદ્યોતિવેણીવ્યાલાઙ્ગણાફણામ્ ॥ ૧॥

ઉપમાનઘટમાનપ્રહારિમુખમણ્ડલામ્ ।
નવેન્દુનિન્દિભાલોદ્યત્કસ્તુરીતિલકશ્રિયમ્ ॥ ૨॥

ભ્રૂજિતાનઙ્ગકોદણ્ડાં લોલનીલાલકાવલિમ્ ।
કજ્જલોજ્જ્વલતારાજચ્ચકોરીચારુલોચનામ્ ॥ ૩॥

તિલપુષ્પાભનાસાગ્રવિરાજદ્વરમૌલિકામ્ ।
અધરોદ્ભૂતબન્ધૂકાં કુન્દાલીબન્ધુરદ્વિજામ્ ॥ ૪॥

સરત્નસ્વર્ણરાજીવકર્ણિકાકૃતકર્ણિકામ્ ।
કસ્તૂરીબિન્દુચિબુકાં રત્નગ્રૈવેયકોજ્જ્વલામ્ ॥ ૫॥

દિવ્યાઙ્ગદપરિષ્વઙ્ગલસદ્ભુજમૃણાલિકામ્ ।
બલારિરત્નવલયકલાલમ્બિકલાવિકામ્ ॥ ૬॥

રત્નાઙ્ગુરીયકોલ્લાસિવરાઙ્ગુલિકરામ્બુજામ્ ।
મનોહરમહાહારવિહારિકુચકુટ્મલામ્ ॥ ૭॥

રોમાલિભુજગીમૂર્ધરત્નાભતરલાઞ્ચિતામ્ ।
વલિત્રયીલતાબદ્ધક્ષીણભઙ્ગુરમધ્યમામ્ ॥ ૮॥

મણિસારસનાધારવિસ્ફારશ્રોણિરોધસમ્ ।
હેમરમ્ભામદારમ્ભસ્તમ્ભનોરુયુગાકૃતિમ્ ॥ ૯॥

જાનુદ્યુતિજિતક્ષુલ્લપીતરત્નસમુદ્ગકામ્ ।
શરન્નીરજનીરાજ્યમઞ્જીરવિરણત્પદામ્ ॥ ૧૦॥

રાકેન્દુકોટિસૌન્દર્યજૈત્રપાદનખદ્યુતિમ્ ।

અષ્ટાભિઃ સાત્ત્વિકૈર્ભાવૈરાકુલીકૃતવિગ્રહામ્ ॥ ૧૧॥

મુકુન્દાઙ્ગકૃપાપાઙ્ગામનઙ્ગોર્મિતરઙ્ગિતામ્ ।
ત્વામારબ્ધશ્રિયાનન્દાં વન્દે વૃન્દાવનેશ્વરિ ॥ ૧૨॥

અયિ પ્રોદ્યન્મહાભાવમાધુરીવિહ્વલાન્તરે ।
અશેષનાયિકાવસ્થાપ્રાકટ્યાદ્ભુતચેષ્ટિતે ॥ ૧૩॥

સર્વમાધુર્યવિઞ્જોલીનિર્માઞ્છિતપદામ્બુજે ।
ઇન્દિરામૃગ્યસૌન્દર્યસ્ફુરદઙ્ઘ્રિનખાઞ્ચલે ॥ ૧૪॥

ગોકુલેન્દુમુખીવૃન્દસીમન્તોત્તંસમઞ્જરિ ।
લલિતાદિસખીયૂથજીવાતુસ્મિતકોરકે ॥ ૧૫॥

ચટુલાપાઙ્ગમાધુર્યબિન્દૂન્માદિતમાધવે ।
તાતપાદયશઃસ્તોમકૈરવાનન્દચન્દ્રિકે ॥ ૧૬॥

અપારકરુણાપૂરપૂરિતાન્તર્મનોહ્રદે ।
પ્રસીદાસ્મિન્ જને દેવિ નિજદાસ્યસ્પૃહાજુષિ ॥ ૧૭॥

કચ્ચિત્ ત્વં ચાટુપટુના તેન ગોષ્ઠેન્દ્રસૂનુના ।
પ્રાર્થ્યમાનચપાલાઙ્ગપ્રસાદા દ્રક્ષ્યસે મયા ॥ ૧૮॥

ત્વાં સાધુ માધવીપુષ્પૈર્માધવેન કલાવિદા ।
પ્રસાધ્યમાનાં સ્વિદ્યન્તીં બીજયિષ્યામ્યહં કદા ॥ ૧૯॥

કેલિવિસ્રંસિનો બકકેશવૃન્દસ્ય સુન્દરિ ।
સંસ્કારાય કદા દેવિ જનમેતં નિદેક્ષ્યસિ ॥ ૨૦॥

કદા બિમ્બોષ્ઠિ તામ્બૂલં મયા તવ મુખામ્બુજે ।
અર્પ્યમાણં વ્રજાધીશસૂનુરાચ્છિદ્ય ભોક્ષ્યતે ॥ ૨૧॥

વ્રજરાજકુમારવલ્લભાકુલસીમન્તમણિ પ્રસીદ મે ।
પરિવારગણસ્ય તે યથા પદવી મે ન દવીયસી ભવેત્ ॥ ૨૨॥

કરુણાં મુહુરર્થયે પરં તવ વૃન્દાવનચક્રવર્તિનિ ।
અપિ કેશરિપોર્યથા ભવેત્ સ ચટુપ્રાર્થનભાજનં જનઃ ॥ ૨૩॥

ઇમં વૃન્દાવનેશ્વર્યા જનો યઃ પઠતિ સ્તવમ્ ।
ચાટુપુષ્પાઞ્જલિં નામ સ સ્યાદસ્યાઃ કૃપાસ્પદમ્ ॥ ૨૪॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં શ્રીચાટુપુષ્પાઞ્જલિઃ સમાપ્તા ।

*Chatupushpanjalih*

pdf was typeset on February 23, 2019

Please send corrections to *sanskrit@cheerful.com*